www.shaivam.org

**शिवपञ्चाक्षर स्तोत्रम**

नागेन्द्रहाराय त्रिलोचनाय

भस्मांगरागाय महेश्वराय ।

नित्याय शुद्धाय दिगंबराय

तस्मै नकाराय नमः शिवाय ॥*१॥

मन्दाकिनीसलिलचन्दनचर्चिताय

नन्दीश्वरप्रमथनाथमहेश्वराय ।

मन्दार मुख्यबहु पुष्पसुपूजिताय

तस्मै मकाराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्द सूर्याय

दक्षाध्वर नाशकाय ।

श्रीनीलकण्ठाय वृषध्वजाय

तस्मै शिकाराय नमः शिवाय ॥३॥

वसिष्ठकुंभोद्भवगौतमार्यमुनीन्द्रदेवार्चितशेखराय ।

चद्रार्क वैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४॥

यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।

दिव्याय देवाय दिगंबराय तस्मै यकाराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।

शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवपञ्चाक्षरस्तोत्रं संपूर्णम ॥

(*१-अस्याग्रे 'आसमाप्तं' इत्यादिप्रक्षिप्तश्लोकाः क्वचिद्दृश्यन्ते ।)

www.shaivam.org